PK 3799
.K29D5
1857

FT MEADE
ASIAN

1822

LIBRARY OF CONGRESS

Kāñcanācaryya
25318
L76
Dhanañjayavijayaḥ

# । धनञ्जयविजयः ।

॥ श्रीकाञ्चनाचार्य्यरचितः ॥

गवर्णमेण्टसंस्कृतपाठशालाध्यापक

श्रीतारानाथ तर्कवाचस्पति

संस्कृतः ॥

॥ विश्वप्रकाशयन्त्रे मुद्रितः ॥

संवत् १९१४ ।

# DHANANJAYAVIJAYA

BY

KANCHANA ACHARYA.

EDITED

BY

PUNDIT TARANATH TARKAVACHASPATI.

*CALCUTTA :*

Printed AND Published

BY

HERUMBO CHUNDER BANERJEE & Co.

AT

BISHWAPROKAS PRESS TAMER'S LANE NO 5.

1857.

PK3799
.K29D5
1857
Orien
Sans

WEBER COLLECTION.
1322
61500
105

# । धनञ्जयविजयः ।

## ॥ व्यायोगः ॥

हरेर्लीलावराहस्य दंष्ट्रादण्डः स पातु वः ।
हेमाद्रिकलसा यत्र धात्री च्छत्रश्रियं दधौ ॥

अपिच । तद्वः प्रमार्ष्टु विपदः प्रणतार्त्तिहन्त्र्या
न्यस्तं पदं महिषमूर्द्धनि चण्डिकायाः ।
वैरी यदीयनखरांशुपरीतशृङ्गः
शक्रायुधाङ्कितनवाम्बुधरप्रभोऽभूत् ॥

अपिच । तद्वः सारस्वतं चक्षुः समुन्मीलतु सर्व्वदा ।
यत्र सिद्धाञ्जनायन्ते गुरुपादाब्जरेणवः ।

( नान्द्यन्ते सूत्रधारः )

(समन्तादवलोक्य) अहो रमणीयता प्रभातस्य । तथाहि ।

दाराणां मुरवैरिणो रतिपतेर्मातुस्त्रिलोकीजितः
स्फारतपङ्कजकोटरोदरजुषो निद्राविरामे श्रियः ।
प्रत्युदबुद्धमरालपक्षपटहध्वानप्रबन्धानुगं
भृङ्गी मङ्गलगायिकेव सततं प्रातर्कूजति प्राङ्गणे ॥

( पुनः परितोऽवलोक्य ) अहो रमणीयः शरदारम्भः ।

यतः । सरो हरति मे चेतः प्रोन्मूर्च्छत्पद्मकुट्मलम् ।

अपिच ।

निष्कम्पा पृथिवी सशाद्वलतता निर्दुर्दिनं चाम्बरं
सुव्यक्तामलतारकेन्दु सरितः काशप्रसूनाङ्किताः ।
तोयं वीतविषं सरांसि विकसत्पद्मानि शुभ्रा दिशो
द्रष्टुं सम्प्रति शारदीं श्रियमिमां मन्ये प्रबुद्धो हरिः ॥

(नेपथ्याभिमुखमवलोक्य) क एष लिखितहस्तः समायाति ।

---

( ततः प्रविश्य पुरुषो लिखितमर्पयति )

सूत्रधारः । विम्हश्य वाचयति ।

अस्ति प्रशस्तिसहितः श्रीमान् जयदेवः ।
अर्थिप्रत्यर्थिलक्षैरप्यपराङ्मुखचेतसम् ॥
यं पराङ्मुखतां निन्युः केवलं परयोषितः ।
यस्य चेतसि निर्व्याजं दयं तूलकणायते ॥
क्रोधे विरोधिनां सैन्यं प्रसादे कनकोच्चयः ।

स च प्रसादेन रङ्गमङ्गलं नाम नटं समादिशति ॥

इह शरदि विराजद्वारिजोत्तंसितायां
प्रथमविगतनिद्रः श्रीकराश्लिष्टवक्षाः ॥
शिथिलयति मुरारिर्योगनिद्रानुरागं
तदयमखिललोकस्योत्सवः किं पुनर्नः ॥

तदिदानीं भवता वीररसाङ्कितं रूपकम् अभिनीय गदाधरप्रमुखास्तत्परिषदानन्दनीयेति ॥

किं नाम तादृशं रूपकम्। (स्मृत्वा) आ ज्ञातम्।

कुलं कविमुनेरस्ति पुत्रान् यत्र सरस्वती।
संशिक्षयति धात्रीव नितान्तं मधुरां गिरम्॥
तत्राभवदुपाध्यायो नारायणसमाह्वयः।
जितवादिसहस्रौघः प्राप वादीश्वराभिधाम्॥

अपिच। कृतसंन्यसनात् प्रयच्छतोऽ
प्यभयं भूतगणाय योगिनः।
निजमण्डलभेदशङ्किनो
भयमेकस्य रवेरभूद्यतः॥

तत्सूनुः काञ्चनो नाम समस्तगुणवल्लभः।
गोष्ठीशालेव विद्यानां यस्य जिह्वा विराजते॥

तेन कृतो धनञ्जयविजयो नाम व्यायोगोऽभिनेतव्यः॥

---

(नेपथ्याभिमुखमवलोक्य) कः कोऽत्र भोः॥

(प्रविश्य)

पारिपार्श्विकः। भाव कोऽस्मि। आ।

सूत्रधारः। आहूयतां धनञ्जयविजयाभिनयकुशलो नटवर्गः।

पारिपार्श्विकः। तथा ( इत्युक्त्वा निष्क्रान्तः )

सूत्रधारः। ( प्राचीमवलोक्य स्थित्वा )

चिरमज्ञातः समयवशात् कोऽपि तेजसो निचयः।
प्रकटीभवति विवस्वानेष किरीटीव समयमुत्तीर्णः॥

ततः प्रविशति विराटामात्येन सहार्जुनः।

अर्जुनः। ( सोत्साहम् ) अनुकूलं दैवं लक्ष्यते।

यतः। या लतान्विष्यते सैव लग्ना सम्प्रति पादयोः।
कुरुराजोऽभियातव्यः स्वयमेव समागतः॥

सूत्रधारः। ( सहर्षमवलोक्य ) अये परिगृहीतार्जुनवेषः-
श्यामलकः प्रवृत्तस्तदहं पात्रान्तराणि प्रगुणयामि।

( इति निष्क्रान्तः )

---

( प्रस्तावना )

---

नायकः। ( सहर्षम् )

गोरक्षणं सकलशात्रवमानभङ्ग
स्तोषो विराटनृपतेरुपकारिणश्च।
पर्य्याप्तमेकमपि यत् समरोत्सवाय
सर्व्वं तथा मिलितमद्य ममैव भाग्यैः॥

अपिच। सा मनोरथसम्पत्तिः स एव हि महोत्सवः।

निर्वापयन्ति यद्वैरं परिपन्थिषु मानिनः ॥

अमात्यः। देव नेयं संग्रामस्य भूमिः।

निर्दग्धकालकेयस्य निवातकवचद्विषः।
कौरवास्ते कियन्मात्रं रणाराधितशूलिनः ॥

नायकः। साधु सुयोधन साधु।

यत्पूर्व्वजैरधिगतं भुजविक्रमेण
तत् प्राप्य राज्यमखिलं कपटाच्चदृत्त्या।
गाः साम्प्रतं हरसि भिल्ल इव त्वयाद्य
सापत्रपः कुलगुरुर्विहितो विधुर्नः ॥

अमात्यः। देव सुयोधनचरित्रेण शशिनोऽवनतं शिरः।
चरित्राणि तवैवाद्य कुर्व्वन्तु परमोन्नतम्।

नायकः। (विचिन्त्य) कथमयं नगरसमीपे च्छिन्नसमरोपकरणानयनाय प्रहितः प्रतिपन्नसारथ्यश्चिरयति कुमारः।

---

(ततः प्रविशति विराटकुमारः)

कुमारः। देव अनुष्ठितस्तवादेशस्तदारोहत्वायुष्मान्।

(नायकः कृतसन्नाहो रथमारोहति)

अमात्यः। (सविस्मयं नायकमवलोक्य)

विरचितसमरोचिताङ्गभूषः
परिहृतभूषितवेष एष भाति।

जलधरनिकरोपरोधशून्यो
रविरिव राजसुतः शरत्प्रचण्डः ॥
( पुन र्निपुणमवलोक्य )
हेषन्ते यज्जितजलधरध्वानमेते तुरङ्गा
भूमिं पादैर्यदपि च मुहुर्दक्षिणैरालिखन्ति ।
यानौत्सुक्यं यदपि चलनाद्बालधैर्व्यञ्जयन्ति
त्वद्दोर्दण्डद्वितयवशगा तत् समग्रा जयश्रीः ॥

नायकः। अमात्य वयमिदानीं गाःप्रत्यानेतुं प्रस्थिताः सः त्वं गोहरणोद्विग्नं पौरजनं समाश्वासय ।

अमात्यः। यदादिशति देवस्तथा करोमि (इतिनिष्क्रान्तः)

नायकः। (कुमारं प्रति) यावन्मा गमन् दूरे गावस्तावन्नोदयाश्वान् ।

( कुमार स्तथा करोति )

नायकः। ( रथवेगं निरूप्य )
आलिङ्गन्तो वसुधां निजखुरदलितामिवानुनेतुममी ।
वदनविगतचरणा इव संलक्ष्यन्ते जवादश्वाः ॥

अपिच ।
विच्छिन्ना रथचक्रपद्धतिरियं हेलासृतैर्वाजिना—
मायान्तीव जवेन सम्मुखममी मार्गस्थिताः शाखिनः ।
खेदं पादतलाहतेरिव पुरो गन्तुं गतो नेहते
वाहानामनुकूलमारुतभराद्धूतोऽपि धूलिव्रजः ॥

(नेपथ्याभिमुखमवलोक्य) रेरे गोपाला अलं विषादेन। तथाहि।

सिञ्चन्तः करुणारसेन हृदयं यावन्न वत्सा अमी
मातुर्मार्गविलोकनव्यसनिनो मुञ्चन्ति हम्बारवान्।
याचन्ते नहि यावदेव शिशवः पातुं पयो नोत्सुका
स्तावद्गाव इहेत्यवेत भवतां चेतोज्वरः शाम्यतु॥

॥ नेपथ्ये ॥
॥ महाप्यसाश्रो ॥

कुमारः। आयुष्मन्नूनमदूरे कुरुबलम्। यतः।

वाजिव्राजखुराभिघातदलितक्षौणीरजोभिः पुरः
सान्द्रैर्जीर्णकपोतकण्ठरुचिभिर्व्योमेदमास्तीर्यते।
किं वान्येन करीन्द्रगण्डविगलद्दानाम्बुधारागणा-
भोगांसं प्रथयन्त्यमी परिमलप्रोद्गारिमन्दानिलाः॥

नायकः। सुव्यक्तं कुरुबलम्। तथाहि।

व्याधूतचामरमुदस्तसितातपत्र—
मुत्क्षिप्तकुन्तभयविद्रुतपक्षिचक्रम्।
एतद्बलं कुरुपतेर्भरपूर्य्यमाण—
शङ्खध्वनिचसदरण्यमृगं पुरस्तात्॥

(बाहू प्रति सोत्साहम्)

कान्तारक्षितिषूपधानविषये यद्धूलिभिर्धूसरौ
पाञ्चालीपरिरम्भनिर्भररसास्वादेऽपि यद्दश्चितौ ।
यत् कान्ताजनयोग्यदन्तवलयैरावेष्टितौ निस्त्रपं
तद्बाहू स्मरतं चिराय पुरतस्तिष्ठन्त्यमी वैरिणः ॥

॥ नेपथ्ये ॥

धृतधनुरिव दर्पः साहसस्येव मूर्त्तिः
स पटुरिव रसोऽयं विग्रही वीरनामा ।
दधदिव जयलक्ष्मीं सन्निधौ चापवल्ली—
मगणितकुरुराजः कोऽयमेकोऽभ्युपैति ॥

( उभौ शृणुतः )

कुमारः । आयुष्मन् कस्येदमुदारं वचनम् ।

नायकः । अस्मत्प्रथमगुरोः शारद्वतस्य ।

॥ पुनर्नेपथ्ये ॥

द्वन्द्वाहवाराधितशूलपाणिः
स पाण्डवः खाण्डवतर्पिताग्निः ।
ज्याघातजातः किणसन्निवेशः
करद्वये यस्य परस्य पुंसः ॥

अपिच । गलितनिखिलशस्त्रं बाहुमात्रावशेषं
द्विगुणिततररागं यं निरीक्ष्य स्मरारिः ।

विहितकपटरूपः साहसाक्रुष्टचेता
नयनमभिललाटं दर्शयामास सद्यः ॥

व्यक्त एवायमर्ज्जुनः। तथाहि

हेलोल्लङ्घितवारिधिर्जनकजाविस्लेषशुष्यन्मनः—
कौसल्यासुतदैन्यपानसुपटुर्ग्रस्तांशुमन्मण्डलः।
निर्दग्धाखिलराक्षसेश्वरपुरः सौमित्रिसंजीवन—
प्रोत्खातौषधिपर्व्वतोऽस्य मरुतः पुत्रो ध्वजे वर्त्तते॥

(उभौ शृणुतः)

कुमारः। आयुष्मन्।

क्रतवीररसोद्रेकैः वैदर्भीगर्भितैः पदैः।
त्वयि पुत्र इवात्यर्थं पक्षपातं व्यनक्ति कः॥

नायकः। कुमार किमित्युच्यते पुत्र इवेति ननु पुत्र एवाहमाचार्य्यस्य।

॥ नेपथ्ये ॥

तूर्णं कर्णं धनुर्गृहाण समरे शारदत स्त्वग्रणी
र्भारद्वाज भृगूद्वहादधिगतान्यस्त्राणि संशिक्षय।
द्रौणे नन्दय कौरवक्षितिपतिं पुत्रस्तथा शान्तनोः
संधत्ते समरोचितं पुररिपोः शिष्योऽयमास्तेऽग्रतः॥

नायकः। (सानन्दम्) सोऽयं कुरुराजः सेनायां सन्नाह्यति योधान्।

कुमारः। देव सारथिना परबलयोधाः स्वरूपतो वीर्य्यतश्च ज्ञातव्याः।

नायकः। पश्यैनं भुजङ्गजावेदितकौटिल्यम्।

यस्येन्दुवंशकलङ्कप्रथमाङ्कुरस्य
सौजन्यगन्धमपि जातु न वेत्ति चेतः॥
आ जन्मनो विषजलाग्निमुखैरुपायै
रसन्निकारनिरतः कुरुराज एषः॥

कुमारः। कोऽयं ततो दक्षिणतः।

नायकः। (साश्चर्य्यम्)

रोषोत्कर्षकषायितोल्वणदृशोऽप्यग्रे हिडिम्बद्विषः
पाञ्चालीहृदयस्थलात् सरभसं लज्जादुकूलाञ्चलः।
निर्मोकः फणिनस्तनोरिव बलाद्येनावकृष्टः पुरा
सोऽयं साहसिकाग्रणीस्तनुरथो दुःशासनस्तिष्ठति।

कुमारः। किमतः परं साहसम्।

नायकः। इतः पश्य। (सप्रणामम्)

प्रतिफलितरविप्रभावितानः
स्फुरदुरुकाञ्चनवेदिमूचितेज्यः।
दधदुपनिषदः श्रियं समग्रां
प्रथितयशा गुरुरेष कौरवाणाम्॥

कुमारः। महानुभावः खल्वेष लक्ष्यते।

नायकः। इतः पश्य।

योऽयं ललाटतटमण्डितचण्डचूडः
संलक्ष्यते स्वयमिव त्रिपुरप्रमाथी ।
मूर्त्तोऽस्त्रवेद इव दुर्विषहः परेषां
पुत्रो गुरोः पुनरयं दयितः सखा मे ॥

कुमारः । पुनरावेदय ।

नायकः ।

येनोच्चैर्ध्वजमिषतः कलस इवारोपितो धनुर्वेदः ।
कनककमण्डलुमण्डितरथवंशो भाति गुरुरेषः ॥

कुमारः । कोऽयं कुरुराजसन्निधौ समरार्थीव दृश्यते ।

नायकः । (सामर्षम्)

मूलं सुयोधनकृताखिलदुर्नयानां
यद्दोर्बलं भृगुकुलोद्वहगूढशिष्यः ।
सोऽयं प्रसन्नबलसूदनदत्तशक्तिः
सूतात्मजो निजकुलानुचिताभिमानः ॥

कुमारः । (सोपहासम्) नन्वेष घोषयात्रायां विदितप्रभावः (१) । क एष ध्वजः ।

---

(१) सूतपुत्रं जिघांसन्तः समन्तात् पर्य्यवाकिरन् ।
अन्येऽस्य युगमच्छिन्दन् ध्वजमन्ये न्यपातयन् ॥
इत्युपक्रम्य। ततो रथादवप्लुत्य सूतपुत्रोऽसिचर्म्मभृत्।
विकर्णरथमास्थाय मोक्षयाश्वाननोदयत्। म,भा,व,घो

नायकः । ( सप्रणामम् )

अन्याङ्गनापरिहृतिप्रणयेन कीर्त्त्या

वालिङ्गितो धवलया पलितच्छलेन ।

द्वन्द्वाहवप्रकटनिर्जितजामदग्न्यो

देवव्रतः पृथुयशाः स पितामहो नः ॥

सूत त्वरय त्वरय तुरगान् ।

॥ नेपथ्ये ॥

वैमानिका इमे व्योम्नि समारालोकनोत्सुकाः ।

बाहुसारमिदानीं त्वं प्रदर्शय धनञ्जय ॥

---

( ततः प्रविशति विद्याधरसहित इन्द्रः प्रतीहारी च )

इन्द्रः । ( साश्चर्य्यम् )

वाक्कलहोऽपि गहनो बहुभिर्बलिनो विहीनसामर्थ्यैः ।

किमुतानेकैर्बलिभिः क्रूरास्त्रनिपातदारुणः समरः ॥

( पुनः सविस्मयम् )

एको रथी प्रतिरथास्तु निरस्तसंख्याः

कर्णादयः सुचिरराज्यमदेन दृप्ताः ।

वत्सस्तथाप्यहह निग्रहणं प्रविष्टः

सत्त्वं हि नोर्ज्जिततरं विमृशत्यपायम् ॥

कुमारः। (पुरोऽवलोक्य) देव कुरुपतिरेवागच्छति।

नायकः। पूर्णास्तर्हि मनोरथाः।

---

(ततः प्रविशति रथारूढो दुर्योधनः)

दुर्योधनः। (नायकं विलोक्य सामर्षम्)

वनवासपरिक्लेशात् किं निर्विण्णोऽसि जीवने।
यदभीरेक एव त्वमनेकैर्योद्धुमुद्यतः॥

नायकः। (सोपहासम्)

एको निवातकवचान् सह कालकेयै-
र्भस्मीचकार भगिनीमहरच्च शौरेः।
एकेन खाण्डववनं जुहवेऽनले च
पार्थस्य नाभिनव एष रणेषु पन्थाः॥

दुर्योधनः। अलमेतैरुपहासैः। उपस्थितो निकषोपलोपमः संग्रामः।

नायकः। (सहासम्)

अपसर कुरुनाथ द्यूतमन्यादृशं तद्-
द्रुपदनृपतिपुत्री यत्र दासीकृतासीत्।
इह हि शरशलाकापातपूर्वं सगर्वं
प्रतिनृपतिशराक्षैः खेलयद्यूतकेलिः॥

दुर्योधनः। (सामर्षम्)

करिवदनवलयभूषितकरश्चिरत्यक्तकार्म्मुकाभ्यासः।
नर्त्तनशालां प्रविश प्रवीरपुरुषोचितो हि ंग्रामः ॥

कुमारः। (सोल्लुण्ठम्) आर्य्यैनं चिरपरित्यक्तकार्म्मुकाभ्यास इत्यभिधत्से तद्युक्तम्।

संक्रन्दनप्रहितखेचरवर्गबद्ध (१)
युष्मत् कृपाकुलनिजाग्रजशासनेन।
भीमानुजेन विहिता शरपञ्जरश्री— (२)
र्नालोकिता हि भवता नृप विक्लवेन ॥

विद्याधरः। देव प्रौढः खल्वेष वत्सः।

इन्द्रः। राजपुत्रो ह्ययम्।

दुर्य्योधनः। सूत अलं विप्रजनोचितवाक्कलहेन विषमेयं भूमिः रथसञ्चारोचितां भुवमवतराम।

---

(१) प्रियदर्शी महाबाहो धार्त्तराष्ट्रो महाबलः।
गन्धर्व्वैर्ह्रियते राजा पार्थास्तमनु धावत ॥
दुःशासनोदुर्विषहो दुर्म्मुखोदुर्ज्जयस्तथा।
बद्धा ह्रियन्ते गन्धर्व्वैराजदाराश्च सर्व्वशः। इति।
इति महाभारते वनपर्व्वघोषयापात्रापर्व्वणि ॥

(२) स तानुत्पतितान् दृष्टा कुन्तीपुत्रो धनञ्जयः।
महता शरजालेन समन्तात्पर्य्यवारयत्।
ते बद्धाःशरजालेन शकुन्ताइव पञ्जरे।
इति महाभारते वनपर्व्वघोषयापात्रापर्व्वणि ॥

नायकः। यदभिरुचितं कुरुपतये।

( इति निष्क्रान्तौ )

---

विद्याधरः। ( नायकरथं निर्द्दिश्य ) देव

त्वन्नन्दनस्यन्दनवाजिराजिक्षुरक्षतक्षुस्सरजःपताकाः।
विपक्षवक्षोऽरणिमन्थनोत्थप्रतापवह्नेरिव धूमलेखाः॥

इन्द्रः। भद्र महाकविरसि।

विद्याधरः। देव निकटगते किरीटिनि प्रवृत्तः कोलाहलः कुरूणाम्। तथाहि

हेषाघोषैर्हरीणां जितघननिनदैर्बृंहितैः कुञ्जराणां
ज्याघातोत्थैर्निनादैः पटुपटहरवैर्मर्द्दलोद्दामशब्दैः॥
प्राप्तैः कर्णोपकण्ठं मदगजनिवहस्कन्धघण्टाप्रणादैः
शृङ्गाराय(२) त्वरन्ते चिदशमृगदृशो वीरवर्गानुरक्ताः॥

प्रती। देव ण कोलाहलमेत्तं जस्स बि पउत्तं कुरुबलं पच्चहिआतस्स तुह उत्तससिहिमुहं प्रचलिदं। देव पेक्ख आकसआकड्टिअकठिणफग्गुणओदण्डमहणिस्सरन्तसरणिअरेहिं के बि खण्डिदगत्ताओ के बि भग्गकोअण्डाओ के बि पमुडिदसीसकाओ के बि

---

(२) शृङ्गाराय वेषभूषाकरणाय।

णिभिसिण्णाओ के बि भग्गभुजाओ केबि बिक्ख-
दबक्खत्थलाओ कुरुबले भटा दीसन्ति ।

इन्द्रः । (सहर्षम्) कृतहस्तः खल्वेष वत्सः ।

विद्याधरः । व पश्य पश्य ।

मुञ्चन्ति मदवारि वारणगणै र्मेघायितं कार्म्मुकै
रेतैः शक्रशरासनायितमधश्छत्रैः शिलीन्ध्रायितम्।
खद्योतायितमस्त्रघट्टनसमुद्भूतस्फुलिङ्गैःस्फुरन्—
नाराचैरशनायितं रणभुवा सैन्यैर्नभस्यायितम्॥

अपिच । त्वत्पुत्रमुक्तविशिखे रशनिप्रकाशै
रामूललूननवकेतककान्तदन्ताः ।
त्रासावसन्नमदधारकपोलभागाः
सम्पादयन्ति करिणः करिणीभ्रमं नः ॥

इन्द्रः । (सतोषम्)
हरान्तेवासिनस्तस्य कालकेयान्तकस्य च ।
यदुनाथसनाथस्य का श्लाघा कौरवैर्जितैः ।

प्रतीहारी । पेक्खदु देबो ।
बाणप्पलूणमत्तबारणगेरगेर
णाणासिराहिमुहदत्तगहीरतुण्डा ।
एसा पणच्चिदकराङ्गुलि कण्ठदिड्ढं
रत्तासवं पिबइ काबि पिसाअकसा ॥

विद्याधरः । देव पश्य ।

एते मत्तमतङ्गजाः प्रजविनः श्वासाकुलाधोरणाः
स्फूर्जच्चन्द्रकिवर्हभारकलितोद्दण्डध्वजश्रेणयः ॥
कुप्यत्त्वत्करवज्रपातचकितप्रभ्रान्तपृथ्वीधर
व्यूहभ्रान्तिमुदञ्चयन्ति नितरां त्वत्पुत्रविद्राविताः ॥

इन्द्रः । ( सहर्षं पश्यति )

प्रतीहारी । देव पेक्ख पेक्ख ? णिरंतर विक्खित्तबाण-णिउरम्बपरिक्खदगअणरुहिरपाणसंतप्पिदाओ सा-ऊआदोत्तरं जादुहाणजोइणीओ अहिणन्दन्ति तुह उत्तस्स विअअं ।

इन्द्रः । जय एव तर्हि सत्याशिषस्ताः ।

विद्याधरः । (विभाव्य) देव महद्युद्धं वर्त्तते । पश्य पश्य ।

वपुषि भटकरोटिन्यस्तकीलालसिन्धुं
द्विरदकरमृणालैर्योगिनीभिर्निपीय ।
समरविजयिने यद्बाहुमुद्यम्य भूयः
प्रकटितपरितोषं स्वस्तिवादोऽभितेने ॥

अपिच ।

भुग्नभ्रूयुगलैः क्रुधा समधिकस्फारारुणाक्षैः क्षणात
स्वेदाम्भःपटलप्रमृष्टतिलकैर्दष्टाधरोष्ठैरपि ।
दृष्टश्मश्रुभिरुत्पतद्भिरभितः संकीर्णमालक्ष्यते
त्वत्पुत्रास्त्रनिकृत्तवैरिसुभटश्रेणीशिरोभिर्वियत् ॥

( पुनः सविस्मयमवलोक्य ) देव पश्य ।

कोऽप्येष खण्डितशिरा विकसन्मुखश्रीः
प्रारब्धताण्डवविधिः सुरकामिनीभिः ।
आलोक्यते निजकराभिनयानुरूप
व्यापारितेक्षणनिवेदितसत्त्वसारः ॥

इन्द्रः । ( सहर्षम् ) किं किं पश्यामि दोलायितं मनः ।

मायाविभिः कुरुबलैः सह युध्यमानं
कुन्तीसुतं रणशिरस्यसहायवीरम् ।
तद्वैरिवीरवरणेषु तथाच नूनं
सापत्न्यसम्भ्रमकलिं सुरकामिनीनाम् ॥

विद्याधरः । एवमेतत । ( अन्यतोऽवलोक्य )
देव पश्य पश्य ।

दूरात्प्रोत्सार्य्यमाणापरशरनिकरोज्ज्वालकीलाभिघात
प्रभ्रश्यद्वाजिवर्गभ्रमणनियमनव्याकुलव्यग्रसूतः ।
लेढि प्रौढो हुताशः कृतलयसमयाशङ्कमाकाशवीथिं
गङ्गासूनुप्रमुक्तप्रथितहुतवहास्त्रानुभावप्रसूतः ॥

प्रतीहारी । देव अह्माणं बि णिअडवत्ती भआणओ
एसो हुदासणो ।

विद्याधरः । भद्रे मा भैषीः किं नामेदं किरीटिनः ।
पश्य पश्य ।

नीलैः कालाञ्जननिभतमःस्तोमलिप्तान्तरिक्षै—
र्विद्युद्दामद्युतिधवलिताशेषदिक्चक्रवालैः ।

धीरध्वानैः कलभकनिभैः स्थूलधाराः सृजद्भि—
मेंघैर्नीतः प्रलयमनलो वारुणास्त्रप्रसूतैः ॥

इन्द्रः। महानुभावः खल्वेष वत्सः।

प्रतीहारी। देव सम्पदं राहामुहेण भुजङ्गमत्थं पउत्तं आलोलजीहजुअलकरालमुहणीसरन्तगरलधूमलेहाकरम्बिदफणारअणकिरणमालाविडम्बिदसुरकोअण्डाओ विहलिदमअलपुहवीवलआओ पेक्खणमेत्तदड्ढमहानडीरुहाओ अपसरन्ति सप्पाओ॥

विद्याधरः।

दीर्घैः कज्जलरश्यवल्मकुटिलैर्व्यक्तैः खलालामिव
व्यालैर्योगिजनैरिवाम्बरतलव्याप्तैर्लसत्स्वस्तिकैः।
रत्नोद्भासिकरोज्ज्वलैर्नृपतिवत्सत्वस्थवङ्गोगिभी
राधेयास्त्रभुजङ्गमास्त्रजनितैर्दिक्चक्रमाक्रम्यते।

इन्द्रः। खाण्डवदाहे कृतवैराः किं दशन्ति सर्पाः।

विद्याधरः। अलं विषादेन अर्जुनेन प्रयुक्तं गारुडमस्त्रम्। पश्य पश्य।

पक्षाघातनिपातमारुतभरात्प्रोल्लिङ्घितपृथ्वीधरा
सद्यो दृष्टविशालभोगभुजगाः सूर्योपकण्ठस्पृशः।
सन्तापं जलवल्ल्यसी कुलगुरोस्तीक्ष्णास्त्या सारये—
मैन्ये वैरिनृपप्रमायविकसद्विक्रान्तयः पक्षिणः॥

इन्द्रः। (सहर्षम्) ततस्ततः।

प्रतीहारी। एसो सम्पदं दुज्जोधणभड्ढिदेण दोणेण-मुत्तो वारणबाणो तुह उत्तस्स समुपचलिदो।

विद्याधरः। (सम्यगवलोक्य) प्रयुक्तं वैनायकमस्त्रम्। पश्य पश्य।

सिन्दूरारुणमौलिभिः स्वदग्रनप्रोताम्बुदश्रेणिभि-
र्लीलोदस्तकराग्रमारुतभरप्रोद्भूततारागणैः।
पादाघातचलत्कुलक्षितिधरैः संकीर्णमालक्ष्यते
हेरम्बास्त्रविनिःसृतैर्मदमुखैः स्तम्बेरमैरम्बरम्॥

इन्द्रः। ततस्ततः।

विद्याधरः। पार्थेन सिंहास्त्रं प्रयुक्तम्। पश्य पश्य।

दंष्ट्राज्योतिःखचितगगनैः केसराटोपभीमै
रुल्लाङ्गूलैः क्षितिधरगुहासञ्चरद्धीरनादैः।
सिंहैरन्तर्नखरशिखरोत्खातकुम्भस्थलासृग्
धारास्वादव्यसनविवशैः क्वापि नीता गजेन्द्राः॥

इन्द्रः। स्वल्पावशिष्टस्तर्हि जयः।

विद्याधरः। देव नैव निरवशिष्टश्च।

हत्वा शान्तनुनन्दनस्य तुरगान् सूतं कुरूणां गुरोः
कर्णस्यापि रथं विदार्य्य कणशः कृत्वा विसंज्ञं कृपम्।
छित्त्वा द्रोणसुतस्य कार्म्मुकलतां विद्राव्य चान्यद्बलं
त्वत्पुत्रो भयविद्रवत् कुरुपतेः पन्थानमन्वेत्ययम्॥

प्रतीहारी। अच्चाहिदं दुज्जाधणस्स।

विद्याधरः। नैव

विमुखे विपतति शस्त्रं संक्रन्दननन्दनस्य न हि जातु।
मणिमयमुकुटनिपातात् कोपाग्निस्तस्य कोपितः किञ्चित्॥

---

(नेपथ्ये)

भोभो राधेयमित्र

राजात्मजापरिभवक्षुभितः प्रतिज्ञा
मार्य्यस्तवोरुदलने यदि नाकरिष्यत्।
नूनं स्फुरन्मुकुटपाटनपाटवेन
तीक्ष्णः शरस्तव शिरोऽप्यहरिष्यदेव॥

प्रतीहारी। देव सुदं तुह्न उत्तस्स वअणं।

इन्द्रः। (सविस्मयम्)

दैवानुकूल्ये किं नाम न शिवाय प्रकल्पते।
क्रुद्धभीमप्रतिज्ञापि ररक्ष कुरुभूपतिम्॥

विद्याधरः। देव दुर्य्योधनमुकुटपाटनक्षुभितैः कर्णपुरस्सरैः कुरुभिः समन्ततो वेष्टितो ऽर्ज्जुनः।

इन्द्रः। (सशङ्कम्) ततस्ततः।

विद्याधरः। देव त्वत्पुत्रेण प्रस्वापनास्त्रं प्रयुक्तम्।

आमीलितेक्षणयुगं प्रसभं प्रसर्पन्—
निश्वासवातभरपूरितकण्ठघोषम्।

गण्डस्थलानिहितकार्म्मुककोटि सुप्तं
संलक्ष्यते कुरुबलं मृतकल्पमेतत् ॥

इन्द्रः। आयोधनश्रान्तानामुचितमेतत्। ततस्ततः।

विद्याधरः।

एकं शान्तनवं हित्वा सर्व्वे विवसनाः कृताः।
प्रमृज्य लोचने पश्चात् प्रबुद्धाश्च पलायिताः ॥

अपिच। निर्जित्य कौरवबलान्यथ वल्लवेभ्यो
गास्ताः समर्प्य मुदितैरभिनन्दितस्तैः।
प्रत्युद्गतः पुरजनैरथ धूलिजाल—
व्यालोलसक्तनयनैरयमेति पार्थः ॥

इन्द्रः। ( आलोक्य ) यद्द्रष्टव्यं तद्दृष्टम्।

---

( ततः प्रविशति रथारूढो नायकः सूतश्च )

नायकः। ( सूतं विलोक्य ) कुमार

न तथा मोदते चित्तं जित्वा कुरुपतिं रणे।
यथा ऽक्षतशरीरेण त्वया मत्स्येन्द्रनन्दन ॥

सूतः। त्वयि रक्षितरि किं दुर्लभम्।

इन्द्रः। ( सरभसम् ) दृष्टद्रष्टव्योऽस्म्यहम्।

( इतिनिष्क्रान्तः )

---

L of C

नायकः । (सतोषम्) सूत

दुःशासनो यदकरोत् कुरुसन्निधाने
पञ्चालराजतनयां प्रहसन् विवस्त्राम् ।
तत्साम्प्रतं प्रतिकृतं हरता मयाद्य
निद्राणकौरवबलस्य रणेऽंशुकानि ॥

सूतः । सर्वमेतत्प्रतिकृतम् तावच्च ।

'ग्रामभरणं नाम ह्येतदुःखं सुखोत्तरम् ।
आजन्म हृदये शल्यं मानभङ्गोहि मानिनाम् ॥

नायकः । (पुरोऽवलोक्य) अये सोपकरणानुज आर्य्य आर्य्यश्च विराट इत एवागच्छति ।

---

(ततः प्रविशन्ति यथानिर्दिष्टा युधिष्ठिरभीमनकुल सहदेवाः सपरिवारो विराटश्च)

युधिष्ठिरः । मत्स्यराज पश्य पश्य ।

रथतुरगरजोभिर्धूसरश्मश्रुजालं
श्रमजलकणिकाभिर्भासुराभिः परीतम् ।
असमसमरकर्म्माक्लान्तमप्यस्य वक्त्रं
जयति विजयलक्ष्मीसङ्गसम्पत्सुशोभम् ॥

विराटः । शोभन्ते विद्यया विप्राः क्षत्रिया विजयश्रिया ।
श्रियोऽनुकूलदानेन लज्जया कुलपालिकाः ।

नायकः । (ससम्भ्रमम्) अये कथमार्य्यः (रथादवतीर्य्य यथोचितमभिवादयते)

सर्व्वे । (अभिनन्दन्ति)

एकोऽहरद्द्रिपुपुराणि हरः खरादीन्
एकश्च दण्डकवने न्यवधीत् स रामः ।
एकोऽधुना कुरुबलानि भवानजैषीन्—
नाश्रावि नैक्षि च पुनः पुरुषश्चतुर्थः ॥

नायकः । स खलु युष्माकं प्रसादः ।

विराटः । (नेपथ्याभिमुखमवलोक्य) राजपुत्र पश्य पश्य ।

वत्सालोकप्रस्नुतापीनभाजः
सिञ्चन्त्यः त्वां क्षीरधाराच्छलेन ।
चन्द्रालोकस्पर्द्धिनीं धेनवस्ते
कीर्त्तिं मर्त्तां नूनमेताः स्रजन्ति ॥

(अर्ज्जुनं सम्बोध्य)

मध्येसभं यो द्रुपदात्मजाया
आकर्ष केशान् धृतराष्ट्रपुत्रः ।
निर्यात्यमेतन्मुकुटं निपात्य
निर्यातितं तस्य सुयोधनस्य ॥

(तत् श्रुत्वाः भीम) । (सामर्षम्) भो भो राजन्नेतत् प्रतिकृतं भवति किन्त

दुःशासनस्य गदया प्रविदार्य्य वक्षः
सद्यः कदुष्णरुधिराणि ततो निपीय।
तच्छोणिताम्बुलुलितां सुनियम्य देव्या
वेणीं तु तत् प्रतिकरिष्यति भीम एव ॥

युधिष्ठिरः। वत्स किमसाध्यं त्वया।

लीलोन्मूलितकौवेरसौगन्धिकवनश्रियः।
लीलाहतहिडिम्बस्य विक्रमं ते रुणद्धि कः॥

भीमः। श्रुत्वा सानुनयम्। शृणोत्वार्य्यः न क्षमेऽहम्।

युधिष्ठिरः। अतीतः कालः क्षमाया आसन्नस्य कालो विक्रमस्य। अलमनुनयेन।

विराटः। युधिष्ठिरं प्रति।

अज्ञानतोनियुक्तस्य यदयोग्येषु कर्म्मसु।
क्षन्तव्यं तन्महाभाग नाज्ञातमपराध्यति॥

नायकः। राजन्नुपकार एवायं नापकारः।

यदि कर्म्मस्वयोग्येषु त्वमस्मान्न न्ययोक्ष्यथाः।
अज्ञातवासं राजायं नाकरिष्यत् सहानुजैः॥

विराटः। नायकं प्रति राजपुत्र

सख्यं साप्तपदीनं यत् सोढव्यः प्रणयो मम।
अतस्त्वामर्थये किञ्चिदुत्तरा मे स्नुषाऽस्तु ते॥

नायकः। यद्रोचते भवते।

स्वयमायान्तीं गेहे लक्ष्मीं को नावमन्यते मूढः।
दैवानुकूलता सा यदयाचितमाप्यते ऽभीष्टम् ॥

विराटः। किन्ते भूयः प्रियमुपकरोमि।

नायकः।

निस्तीर्णोऽज्ञातवासो रणभुवि विजिता धार्त्तराष्ट्राः सकर्णाः
स्त्रीरत्नं त्वत्तनूजा समजनि तनयस्याभिमन्योः कलत्रम्।
गावः प्रत्याहृतास्ताः सुहृदपि परमस्त्वं च नः श्लाघनीयः
तज्जाने नैव किञ्चित् सुचिरमवमृशन् यन्मया प्रार्थनीयम्॥

तथापीदमस्तु।

सौजन्याम्बुतसिन्धवः परहितप्रारम्भवीरव्रता
वाचालाः परवर्णने निजगुणालापे च मौनव्रताः।
आपत्स्वप्यविलुप्तधैर्य्यनिचयाः सम्पत्स्वनुत्सेकिनो
मा भूवन् खलवक्त्रनिर्गतविषम्लानाननाः सज्जनाः॥

अपिच। सारस्वतं स्फुरतु चेतसि सत्कवीनां
चक्षुर्भवन्तु कृतिनो गतमत्सरस्य।
भूपाश्च सन्तु कविसूक्तिषु सानुरागाः
त्यज्य मण्डनकविप्रणयानुरागम्॥

विराटः। तथास्तु इति निष्क्रान्ताः सर्व्वे॥

इति श्रीकाञ्चनाचार्य्यविरचितो धनञ्जयविजयो नाम
॥ व्यायोगः समाप्तः॥

---

LC FT. MEADE
0 018 952 289 7